# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 5 | गुणाः – ५० |
| विषयः – पुराणेतिहासः | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १७/०७/२०२१ | सन्दर्भग्रन्थः – श्रीमद्भागवते नवमस्कन्धः, मार्कण्डेयपुराणे च 79-91 अध्यायाः | |

**सूचना -** **निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ द्वयोः पद्ययोः ससन्दर्भप्रसङ्गं व्याख्या कार्या।**

१ स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने।
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये॥
२ अम्बरीषो महाभागः सप्तद्वीपवतीं महीम्।
अव्ययां च श्रियं लब्ध्वा विभवं चातुलं भुवि॥
३ भगवञ्छ्रोतुमिच्छामि राजर्षेस्तस्य धीमतः।
न प्राभूद् यत्र निर्मुक्तो ब्रह्मदण्डो दुरत्ययः॥

**प्रश्नः २ वैवस्वतमनुपुत्रस्य सुकन्यायाश्च चरित्रं वर्णयत।**

**प्रश्नः ३ भगवतः श्रीरामस्य दिव्यलीलाः प्रतिपादयत।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या।**

१ स्वागतं ते वरारोहे आस्यतां करवाम किम्।
संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः॥
२ न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥
३ वर्णयामि महापुण्यं सर्वपापहरं नृणाम्।
यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते॥

**प्रश्नः ५ परशुरामचरित्रं तत्कृतक्षत्रियसंहारं च वर्णयत।**

**प्रश्नः ६ निमिवंशाख्यानं भागवतोक्तदिशा उपपादयत।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।**

१ महामाया हरेश्चैषा तया सम्मोह्यते जगत् ।
ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥

२ तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ।
देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥

३ संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ।
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥

**प्रश्नः ८ मधु-कैटभवधप्रसङ्गं यथाग्रन्थं वर्णयत ।**

**प्रश्नः ९ देवैः कृतां देवीस्तुतिं तथा च देव्या देवेभ्यः दत्तं वरदानम् उपपादयत ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ वर्षशतैरपि कस्य वंशस्य वर्णनं कर्तुं न शक्यते ?
२ श्रद्धादेवी होतारमुपगम्य प्रणम्य किमयाचत ?
३ इलां नाम कन्यां कुमारं विधातुं कः प्रभुं प्रार्थयामास ?
४ पुत्रकामः सन् मनुः कुत्र कतिवर्षं च तपस्तेपे ?
५ रात्रौ शार्दूलशङ्कया कः गोशिरच्छेदमकरोत् ?
६ च्यवनमहर्षये यौवनं कः ददौ ?
७ अम्बरीषं व्यापादनाय कृत्यां कः निर्ममे ?
८ नवमस्कन्धे कति अध्यायाः ?
९ 'साधूनां हृदयं त्वहमिति' कः ब्रूते ?
१० यज्ञशालायां रात्रौ अभिमन्त्रितं जलं कः पपौ ?
११ सूर्यतनयः सावर्णिः कतमो मनुः ?
१२ वने कः पुत्राणां कुशलाकुशलं ज्ञातुमभिलषति ?
१३ देव्यै कमण्डलुं कः ददौ ?
१४ हिमालये विष्णुमायां के प्रतुष्टुवुः ?
१५ वने सुरथः कस्याश्रममद्राक्षीत् ?

****